peacock) शिखिवाहनः, वर्हिणवाहनः. His wife is called सेना.

KASKAS, *s.* (Grass) मृणालं, अमृणालं.

*To* KAW, *v. n.* कै (c. 1. कायति, कातुं), ध्रांक्ष् (c. 1. ध्रांक्षति -क्षितुं) or ध्रांक्ष् or ध्वांक्ष् or ध्मांक्ष् (c. 1. ध्मांक्षति -क्षितुं), काकवद् रु (c. 2. रौति, रवितुं).

KAW, *s.* काकरुतं, काकरावः, काकरवः, काकशब्दः, ध्वांक्षरुतं, का शब्दः.

*To* KECK, *v. n.* वम् (c. 1. वमति -मितुं), उद्वम्, उद्वमनं कृ, ऊर्द्ध्वशोधनं कृ.

KEEL, *s.* नौकातलं, नौकातले दीर्घकाष्ठं, नौकाधोभागे दीर्घदारुः *m.*

KEEN, *a.* (Sharp, having a fine edge) तीक्ष्णः -क्ष्णा -क्ष्णं, तीक्ष्णधारः -रा -रं, शितः -ता -तं, निशितः -ता -तं, शितधारः -रा -रं, धाराधरः -रा -रं, तीक्ष्णधाराधरः -रा -रं, खरः -रा -रं, तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, शातः -ता -तं, निशातः -ता -तं, तेजोवान् -वती -वत् (त्), तीक्ष्णाग्रः -ग्रा -ग्रं, प्रखरः -रा -रं.—(As hunger, cold, &c.) तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं.—(Eager, vehement) तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), तीक्ष्णस्वभावः -वा -वं, व्यग्रः -ग्रा -ग्रं, कुतूहली -लिनी -लि (न्), उच्चण्डः -ण्डा -ण्डं, उत्साही &c., अत्यभिलाषी &c., उत्सुकः -का -कं.—(In mind) सूक्ष्मबुद्धिः -द्धिः -द्धि, तीक्ष्णबुद्धिः &c., कुशाग्रीयमतिः -तिः -ति, विदग्धः -ग्धा -ग्धं.—(Acrimonious) तिग्मः -ग्मा -ग्मं, अरुन्तुदः -दा -दं, कटुः -टुः -ट्वी -टु, उग्रः -ग्रा -ग्रं, दंशी -शिनी -शि (न्), दंशकः -का -कं; 'keen words,' वागसिः *f.*, वागिषुः *m. f.*

KEENLY, *adv.* तीक्ष्णं, तीव्रं, तैक्ष्ण्येन, सतैक्ष्ण्यं, तिग्मं, सतैग्म्यं, कटु, उग्रं, तीक्ष्णतया, उग्रतया, निष्ठुरं, खरं, प्राखर्य्येण, तेजसा.

KEENNESS, *s.* (Sharpness of edge) तीक्ष्णता, तैक्ष्ण्यं, धारातीक्ष्णता, धाराशितत्वं, निशितत्वं, तीव्रता, तीक्ष्णाग्रत्वं, तिग्मता.—(Eagerness, vehemence) तीक्ष्णता, स्वभावतीक्ष्णता, व्यग्रता, कौतूहलं, उच्चण्डता, अत्यभिलाषः, उत्साहः, अनुरागः.—(Of mind) बुद्धिसूक्ष्मता -सौक्ष्म्यं, बुद्धितीक्ष्णता -तैक्ष्ण्यं, कुशाग्रीयमतित्वं, विदग्धता.—(Acrimony) तिग्मता, तैग्म्यं, कटुता, उग्रता, अरुन्तुदत्वं, प्राखर्य्यं, निष्ठुरता, नैष्ठुर्य्यं.

*To* KEEP, *v. a.* (Hold) धृ (c. 1. धरति, धर्त्तुं, c. 10. धारयति -यितुं), सन्धृ, धा (c. 3. धत्ते, धातुं), रक्ष् (c. 1. रक्षति -क्षितुं), संरक्ष्; 'to keep in the memory or heart,' हृदये कृ or धृ.—(Have in custody) रक्ष्, अभिरक्ष्, परिरक्ष्, संरक्ष्, पाल् (c. 10. पालयति -यितुं), गुप् (c. 1. गोपायति, गोप्तुं), रक्षणं कृ, रक्षां कृ, पालनं कृ.—(Preserve, guard) रक्ष्, प्रतिरक्ष्, पाल् or पा (c. 2. पाति -तुं), परिपाल्, अनुपाल्, प्रतिपाल्, सम्पाल्, अभिपाल्, उपपाल्, गुप् (c. 1. or c. 10. गोपयति -यितुं), अनुगुप्, अभिगुप्, प्रगुप्, त्रै (c. 1. त्रायते, त्रातुं), परित्रै, संत्रै, अव् (c. 1. अवति -वितुं), गुप्तिं कृ, गोपनं कृ.—(Detain) धृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, रुध्, बन्ध् (c. 9. बध्नाति, बन्द्धुं), प्रतिबन्ध्.—(Restrain) निरुध्, वृ (c. 10. वारयति -यितुं), निवृ, निषिध् (c. 1. -षेधति -षेद्धुं), प्रतिषिध्.—(Tend, feed) पाल्, रक्ष्; 'keep cattle,' गोपालनं कृ, गोरक्षणं कृ, पाशुपाल्यं कृ.—(Practise, perform, observe) आचर् (c. 1. -चरति -रितुं), समाचर्, सेव् (c. 1. सेवते -वितुं), आस्था (c. 1. -तिष्ठति -स्थातुं), अनुष्ठा, समास्था, समुपास्था, विधा (c. 3. -दधाति -धातुं), भज् (c. 1. भजते, भक्तुं), आलम्ब् (c. 1. -लम्बते -म्बितुं), समालम्ब्, अवलम्ब्; 'keep silence,' मौनं भज् or सेव् or अवलम्ब्.—(Fulfil) साध् (c. 10. साधयति -यितुं); 'keep a promise,' प्रतिज्ञां शुध् (c. 10. शोधयति -यितुं), प्रतिज्ञां पाल्.—(Not to divulge) धृ (c. 10. धारयति), न प्रकाश् (c. 10. काशयति -यितुं); 'to keep a secret,' रहस्यं धृ or रक्ष् or गुप्, रहस्यगोपनं कृ.—(Maintain, board) भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, भरणं कृ, भृतिं कृ or दा, पाल्, पुष् (c. 10. पोषयति -यितुं), पोषणं कृ, पालनं कृ.—(Entertain) सत्कृ.—(Have in pay) वेतनं दा.—(Keep back) निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, सन्निग्रह्, संहृ (c. 1. -हरति -हर्त्तुं), उपसंहृ, विधृ, निवृ, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उपसंहरणं कृ.—(Keep company with) सह चर्, सह वस् (c. 1. वसति, वस्तुं), संवस्.—(Keep in, conceal) गुह् (c. 1. गूहति -हितुं), निगुह्, छद् (c. 10. छादयति -यितुं), अन्तर्धा, अपवृ, संवृ, गोपनं कृ.—(Keep off) प्रतिवृ, निवृ, वृ, प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिकृ, निरुध्, व्यपोह् (c. 1. -ऊहते -हितुं), अपसिध्, प्रतिषिध्.—(Keep under) वशीकृ, स्वाधीनीकृ, निग्रह्, प्रत्याहृ.—(Keep up, maintain) धृ, सन्धृ, भृ, सम्भृ, प्रवृत् (c. 10. -वर्त्तयति -यितुं), संस्था in caus. (-स्थापयति -यितुं), पाल्, प्रवर्त्तनं कृ.—(Keep out) निषिध्, निवृ.

*To* KEEP, *v. n.* (Remain, continue) स्था (c. 1. तिष्ठति -ते, स्थातुं), वृत् (c. 1. वर्त्तते -र्त्तितुं); 'to keep on doing any thing,' may be expressed by आस् (c. 2. आस्ते) with the pres. or indec. part. of another verb; as, 'he keeps following me,' मम पश्चाद् आगच्छन् आस्ते. *See* CONTINUE, *v. n.* (Last, endure) स्था, चिरस्थायी -यिनी -यि भू.—(Persevere) पर्य्यवस्था, निर्बन्धं कृ, आग्रहं कृ.—(Adhere, cohere) संसञ्ज् in pass. (-सज्यते -सज्जते), संश्लिष् in pass. (-श्लिष्यते), अनुबन्ध् in pass. (-बध्यते), संलग्नीभू, अनुलग्नीभू.—(Lodge) वस् (c. 1. वसति, वस्तुं), निवस्.—(Keep from) निवृत् (c. 1. -वर्त्तते -र्त्तितुं), परिहृ (c. 1. -हरति -हर्त्तुं), वृज् (c. 10. वर्जयति -यितुं), परिवृज्, विवृज्.—(Keep on) प्रवृत्, प्रारभ्, सम्पद् (c. 10. -पादयति -यितुं).

KEEP, *s.* (Custody, charge) रक्षा -क्षणं, पालनं, गुप्तिः *f.*, गोपनं.—(Condition) अवस्था, स्थितिः *f.*, भावः, वृत्तिः *f.*; 'in good keep,' सुस्थितः -ता -तं.—(Board, maintenance) भृतिः *f.*, ग्रासाच्छादनं, अन्नजलं, भोजनं.—(Stronghold) दुर्गं.—(Dungeon) कारा, कारागारं, निरोधस्थानं, बन्धनागारं, गुप्तिः *f.*

KEEPER, *s.* रक्षकः, रक्षी *m.* (न्), पालकः, पालः, पालयिता *m.* (तृ), रक्षिता *m.* (तृ), अध्यक्षः, पतिः *m.* पः in comp.; as, 'keeper of sheep or cattle,' पशुपालः, मेषपोषकः, गोरक्षकः, गोपालः, गोपः, गवीश्वरः; 'of a prison,' कारारक्षकः, कारागाराध्यक्षः, वन्दिपालः; 'of mad people,' उन्मत्तपालकः; 'of a park,' उद्यानपालः -लकः, उद्यानरक्षकः; 'of a gaming-house,' सभापतिः *m.*, सभिकः, द्यूतसभाधिकारी *m.* (न्).

KEEPERSHIP, *s.* रक्षकत्वं, पालकत्वं, अध्यक्षत्वं, अधिकारित्वं.

KEEPING, *s.* (Custody, guard) रक्षा -क्षणं, गुप्तिः *f.*, पालनं, गोपनं.—(Congruity, harmony) ऐक्यं, सङ्गतत्वं, साङ्गत्यं, सादृश्यं, अविरोधः, योग्यता, आनुरूप्यं.

KEEPSAKE, *s.* स्मरणार्थकदानं, स्मरणार्थं दत्तं द्रव्यं or वस्तु, स्मरणार्थं गृहीतं द्रव्यं, स्मृतिजनकदानं, स्मृतिदानं, प्रीतिदानं, प्रीतिदायं.

KEG, *s.* क्षुद्रभाण्डं, काष्ठभाण्डं, दीर्घगोलाकारं क्षुद्रभाजनं.

*To* KEN, *v. a.* (Descry) दूराद् आलोक् (c. 1. -लोकते, c. 10. -लोकयति -यितुं) or अवलोक् or दृश् (c. 1. पश्यति, द्रष्टुं) or प्रदृश्.—(Know) ज्ञा (c. 9. जानाति, ज्ञातुं).

KEN, *s.* (Reach of sight) चक्षुर्विषयः, नयनविषयः.—(Reach of understanding) बुद्धिविषयः; 'beyond the ken,' अविषयः -या -यं, बुद्ध्यतीतः -ता -तं.

KENNEL, *s.* (House for dogs) श्वशाला, कुक्कुरालयः, श्वगृहं, कुक्कुरागारं.—(Pack of hounds) श्वगणः, कुक्कुरगणः, मृगव्यकुक्कुरगणः.—(Water-course) प्रणाली, जलमार्गः, जलवाहनी.